# उत्तररामचरित उपमाप्रयोगः

डा. रीताज्ञवाली (पौड्यालः)
सहप्राध्यापकः, विश्वविद्यालयविद्यापीठम्, दाङः
jnawalir36nsu@gmail.com

## शोधसारः

व्याकरणानुसारेण समीपस्थं मानमिति सामान्यार्थद्योतिकोपमा कोषेषु सदृश्यार्थे सङ्गृहीतास्ति । वैदिकसंहितासूपनिषत्सु दार्शनिकग्रन्थेषु च बाहुल्येन प्रयुक्तेयं लोकव्यवहारेऽपि स्वाभिलषितार्थं स्फोटयितुमाधिक्येन प्रयुक्ता दृश्यते। संस्कृतकाव्यशास्त्रे तु प्रायः सर्वैरपि संस्कृतकाव्यशास्त्रिभिः स्वकीयेषु लक्षणग्रन्थेषु महाकविभिश्च स्वकीयेषु महाकाव्यादिषु प्राथम्येन लक्षिता प्रयुक्ता च विद्यते। महामुनेर्भरतादारभ्याधुनावधि सर्वैरप्याचार्यैरुपमालङ्कारोपवर्णितः। यद्यपि तेषां शैलिगतभिन्नतायाः कारणाद् भिन्नन्वेऽनुभूयमानेऽपि स्वरूपे तात्त्विकमन्तरं न लक्ष्यते। उपमायां ह्युपमेयम् उपमानं साधारणधर्म उपमावाचकपदञ्चेति चत्वारि तत्त्वानि समाहितानि भवन्ति। तेषु सर्वेषां तत्त्वानामुपादाने पूर्णोपमा एकस्य द्वयोस्त्रयाणां वानुपादाने लुप्तोपमा जायते। मुख्यतया पूर्णोपमायाः षड् लुप्तोपमाया एकोनविंशतिर्भेदाः शास्त्रेषु विवेचिताः। भवभूतेरुत्तररामचरिते हि पूर्णोपमायाः सर्वेषां भेदानां लुप्तोपमायाश्च एकद्वित्रिलुप्तानां प्रायोऽनेकेषां भेदानां षड्पञ्चाशदुत्तर द्विशतसङ्ख्यातेषूनाशीति पद्येषु मनोरमः प्रयोगोऽस्ति। ते चोपमाभेदाः काव्यात्मभूतं रसमुपकुर्वन्तः शोभाधायकतया प्रतिष्ठिताः सन्ति। अत उत्तररामचरिते न केवलं सङ्ख्यादृशा प्रत्युत गुणदृशाप्युपमायाः प्रयोगोऽलङ्कारान्तरापेक्षया बाहुल्येन वर्तते। उपमाप्रयोगदृशा उत्तररामचरितमुत्कृष्टं दृश्यकाव्यं वर्तते।

## शब्दकुञ्जिका

उपमानम्, उपमेयम्, अलङ्कृतिः, उपस्कारकम्, साधारणधर्मः।

## विषयप्रवेशः

संस्कृतनाट्यसाहित्य उत्तररामचरितं पृथगेव वैशिष्यट्यं विभर्ति। संस्कृतसाहित्यशास्त्रे नाटके शृङ्गारवीरयोरन्यतरस्य रसस्य प्राधान्यस्य विधानं वर्तते परन्तूत्तररामचरिते तद्भिन्नं करुणरसस्य प्राधान्यं दृश्यते। तत्र नाटककारेण भवभूतिना स्वयमेव 'एको रसः करुण एव' इत्यनेन करुणरसस्यैव प्राधान्यं समुद्घोषितमस्ति। यद्यपि रसं ध्वनिं वा काव्यात्मत्वं स्वीकुर्वाणैः

काव्याचार्यैः काव्यनाटकादिष्वलङ्कारस्यापरिहार्यत्वं न मन्यते तथाप्ययत्नप्रदिपादितानामलङ्काराणां काव्ये सौन्दर्याधायकत्वं स्वीकृतं वर्तते। अलङ्कारेष्वप्युपमा प्रथमालङ्कृतिः। यथा सर्वैरपि काव्यकारैः स्वकीये काव्यग्रन्थ उपमालङ्कारस्य प्रयोग आधिक्येन विहितो दृश्यते, महाकविना कालिदासेन तूपमालङ्कारप्रयोगविषये 'उपमा कालिदासस्य' इति ख्यातिः लब्धास्ति तथैव भवभूतेरुत्तररामचरितेऽयत्नसाधितानामुपमालङ्काराणां बाहुल्येन योगो दृश्यते। ते चालङ्काराः काव्यात्मभूतं रसमुपकुर्वन्तः शोभाधायकतया प्रतिष्ठिताः सन्ति। अत 'उत्तररामचरित उपमाप्रयोग' इति शीर्षके शोधलेखेऽस्मिन् उत्तररामचरिते प्रयुक्तानामुपमालङ्काराणां विश्लेषणं विधीयते।

## समस्या

नाटकारस्य भवभूतेरुत्तररामचरितनाटक उपमा प्रयोगः कीदृशो वर्तत इति प्राज्ञिकीं समस्यां पुरस्कृत्य लेखोऽयं प्रवृत्तोऽस्ति।

## उद्देश्यम्

नाटककारेण भवभूतिना विरचित उत्तररामचरितनाटके प्रयुक्तानामुपमालङ्काराणां संस्कृतकाव्यशास्त्रदृशा विश्लेषणमस्य लेखस्य प्रमुखमुद्देश्यमस्ति।

## अध्ययनविधिः

अस्मिन्ननुसन्धानेऽवलम्बितोऽध्ययनविधिर्यथा–

**अनुसन्धानप्रकारः** : अध्ययनमिदं गुणात्मकं वर्तते। यत्र निगमनविधिना विश्लेषणं विहितमस्ति।

**अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च :** लेखस्यास्य साहित्यमेव विषयक्षेत्रं वर्तते। यत्र संस्कृतकाव्यशास्त्रे प्रतिपादितस्योपमालङ्कारस्य सैद्धान्तिकमाधारमादाय विश्लेषणं विहितमस्ति। तेन च भवभूतिप्रणीत उत्तररामचरिते प्रयुक्तानामुपमानां विश्लेषणमेवास्य शोधकार्यस्य सीमा वर्तते।

## उपमालङ्कारस्य स्वरूपम्

उपमा शब्दो हि पाणिनीयव्याकरणानुसारेण उपमीते इति व्युत्पत्त्या सामीप्यार्थद्योतकाद् 'उप' इत्युपसर्गकाद् मानार्थकाद् माधातो 'आतोश्चोपसर्गे'(अष्टाध्यायी ३।३।१०६) इत्यङ्प्रत्यये सति निष्पद्यते। अस्य समीपस्थं मानमिति सामान्यार्थो भवति। एतेन च वर्णनीयस्य वस्तुनो यया तद्गतैर्गुणादिभिस्तत्त्वविशेषैः स्वरूपगतं समीपस्थं मानमुपस्थाप्यते सोपमेत्युपमाशब्दस्यार्थोऽस्तीति निश्चप्रचं कथयितु शक्यते। कोशे 'उपमोपमानं स्यात्' (अमरकोषः २।१०।३६) इत्युपमित्यर्थे 'निभसंकाशनीकाशप्रतीकाशोपमादयः' (अमरकोषः २।१०।३७) इति च सदृशार्थ उपमाक्र शब्दः सङ्गृहीतो दृश्यते।

उपमायाः स्वरूपं प्रतिपादयताऽऽचार्येण मम्मटेन 'साधर्म्यमुपमा भेदे' (काव्यप्रकाशः १०।१) इत्यनेनोपमेयत्वेनोमानत्वेन च प्रस्तुतयोर्भिन्नयोः पदार्थयोः समानधर्मेण सम्बन्धप्रतिपादनमुपमा भवतीति प्रतिपादितम्। कविराजेन विश्वनाथेनाप्येतदेव स्पष्टयता 'साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः' (साहित्यदर्पणः १०।१४) इत्युपमा लक्षिता। अस्यायमभिप्रायो भवति यदेकस्मिन् वाक्ये भिन्नयोः पदार्थयोवैधर्म्यरहितस्य सादृश्यस्य प्रतिपादनमुपमा भवतीति। आचार्येण पण्डितराजेन जगन्नाथेन 'सादृश्यं सुन्दरं वाक्यार्थोपस्कारकमुपमालङ्कृतिः' (जगन्नाथः, रसगङ्गाधरः, २००३ ई., पृ.२११) इति लक्षणं विदधता सहृदयहृदयाह्लादकं वाक्यार्थोपस्कारकं सादृश्यमुपमा भवतीति प्रतिपादितम्। यद्यपि प्रायेण सर्वेषामाचार्याणां स्वस्वशैलिगताया भिन्नतायाः कारणाद् लक्षणवाक्येषु भिन्नतायाः प्रतिभानं भवति तथापि लक्षणे स्वरूपे च तात्त्विकमन्तरं नास्ति। एवं सर्वेषामाचार्याणां लक्षणस्य पर्यालोचने वर्णनीयस्य वस्तुनः केनाप्यन्येन वस्तुना चमत्कारपूर्णया शैल्या सादृश्यकथनमुपमेति साररूपेण प्रस्तोतुं शक्यते।

उपमायां हि उपमेयम्, उपमानम्, साधारणधर्म, उपमावाचकशब्दश्चेति चत्वारि तत्त्वानि आवश्यकानि भवन्ति। एतेषां चतुर्णामेव तत्त्वानां ग्रहणे पूर्णोपमा भवति। कस्याप्येकस्य द्वयोस्त्रयाणां वाऽग्रहणे लुप्तोपमा भवति। एवं किल उपमायाः प्रथमं द्वौ भेदौ भवतः – पूर्णोपमा लुप्तोपमा चेति। पूर्णोपमापि श्रौत्यार्थिभेदेन द्विधा विभक्ता। पुनः प्रत्येकं वाक्या-

गता समासगता तद्धितगता चेति भेदेन पूर्णोपमा षड्विधा भवति। लुप्तोपमा धर्मलुप्ता, वाचकलुप्ता, उपमानलुप्ता, धर्मवाचकलुप्ता, धर्मोपमानलुप्ता,
वाचकोपमेयलुप्ता, धर्मोपमानवाचकलुप्तेत्यष्टविधा भवति। तत्र च धर्मलुप्ता वाक्यगाश्रौती समासगाश्रौती वाक्यगार्थी समातृसगार्थी तद्धितगार्थी चेति पञ्चविधा, वाचकलुप्ता समासगा कर्मक्यच्गा आधारक्यच्गा क्यङ्गा कर्मण्वुल्गा कर्तृणमुल्गेति षड्भेदा, उमानलुप्ताया वाक्यगा समागा चेति द्वौ भेदौ, धर्मवाचकलुप्ता क्विप्गता समासगतेति द्विविधा, धर्मोपमानलुप्ताया वाक्यगा समागेति द्वौ भेदौ, वाचकोपमेयलुप्ता केवलं क्यच्गता एका, धर्मोपमानवाचकलुप्तापि केवलं समागा एकविधेति साकल्येन लुप्तोपमाया ऊनविंशतिभेदाः पूर्णायाश्च षडिति पञ्चविंशतिभेदाः प्राचीनैः काव्यशास्त्रिभिर्निर्दिष्टाः सन्ति। (काव्यप्रकाशः
१०।८७–९०) पण्डितराजेन जगन्नाथेन स्वकीये काव्यशास्त्रीयग्रन्थे रसगङ्गाधरे तूपमाया विविधं वैचित्र्यं प्रदर्शयता
षष्ट्युत्तरशतसंख्यातैरप्यधिका भेदाः प्रदर्शिताः। उक्तञ्च तत्र– 'एवं च प्राचां मते पञ्चविंशतिभेदायाः पुनः पञ्चविधतायां सपादशतं भेदाः। द्वात्रिंशद्भेदवादिनां तु षष्ट्युत्तरं शतम्। इतश्चान्येऽपि प्रभेदाः कुशाग्रीयधिषणैः स्वयमुद्भावनीयाः।'(जगन्नाथः, रसगङ्गाधरः २००३ ई., पृष्ठ २८१–२८२)

## उपमाया ऐतिहासिकं विश्लेषणम्

अलङ्कारेषूपमा प्राचीनतमा वर्तते। अस्याः प्रादुर्भावो वाङ्मयेन सहैव जातो दृश्यते। जनसामान्येऽपि स्वाभिप्रेतार्थं प्रकटयितुं बाहुल्येन प्रयुक्तेयं वैदिकवाङ्मयादारभ्याधुनावधि विभिन्नेषु वाङ्मयप्रकारेषु प्रयुक्ता विभिन्नेषु शास्त्रेषु च लक्षिता दृश्यते। सर्वप्राचीने ऋग्वेदेऽप्युपमाया आधिक्येन प्रयोगो दृश्यते–

अभ्रातेव पुंस एति प्रतीची, गर्तारुगिव सनये धनानाम्।
जायेव पत्य उशती सुवासा, उषा हस्रेव निरिणीते अप्सः॥ (ऋग्वेदः १।१२४।७)

इत्यादिषु ऋक्षु,

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्॥(शुक्लयजुर्वेदः ३।६०)

इत्यादिषु यजुष्षु,

व्यपगतकलनाकलङ्कशुद्धः स्वयममलात्मनि पावने पदेऽसौ।
सल्लिकण इवाम्बुधौ महात्मा विगलितवासनमेकतां जगाम॥(महोपनिषत् २।७७)

इत्यादिषु चोपनिषद्वाक्येषु प्रस्तुतमर्थं स्पष्टयितुमुपमायाः प्रयोगो विहितोऽस्ति। न केवलं वेदादिष्वेव प्रत्युत दार्शनिकग्रन्थेष्वपि दार्शनिकीं ग्रन्थिमुद्घाटयितुमुपमा प्रयुक्ता विद्यते। उदाहरणार्थं हि –

अखण्डनित्याद्वयबोधशक्त्या स्फुरन्तमात्मानमनन्तवैभवम्।
समावृणोत्यावृतिशक्तिरेषा तमोमयीराहुरिवार्कबिम्बम्॥(विवेकचूडामणिः १४१)

इत्यत्र मायया आत्मन आवरणस्य दार्शनिकं तत्त्वं स्फोटयितुं राहुना सह सूर्यबिम्बस्यावरणस्य तुलना विहिता विद्यते। इत एतदेव निष्कर्षरूपेण वक्तुं शक्यते यद् अभिलषितमर्थं प्रकाशयितुं वेदेषूपनिषत्सु दार्शनिकग्रन्थेषु पुराणेषु साहित्ये लोकव्यवहारे चोपमायाः प्रयोगो व्यापकतया विद्यत इति।

उपमाया अलङ्काररूपेण काव्यशास्त्रीयं व्याख्यानमपि प्राचीनतमं वर्तते । प्रथममुपमायाः शास्त्रीयं विवेचनमाचार्यस्य यास्कस्य निरुक्ते दृश्यते । तत्र यास्काचार्येण ततोऽपि पूर्वमुपमायाः शास्त्रीयं विवेचनं लभ्यत इत्याचार्यस्य गार्ग्यस्य मतोल्लेखपुर्वकमुपमायाः स्वरूपं प्रतिपादितम्– ' यद् अतत् तत्सदृशं तदासां कर्म इति गार्ग्यः । ज्यायसा वा गुणेन प्रख्याततमेन वा कनीयांसं वा अप्रख्यातं वोपमीयते । अथापि कनीयसा ज्यायांसम् ।'(निरुक्तम् ३।१४) तदनन्तरं काव्यशास्त्रेषु तु महामुनेर्भरतस्य नाट्यशास्त्र उपमारूपकयमकदीपकानां चतुर्णामलङ्काराणा_ मुल्लेखो वर्तते । तत्रापि भरतेनोपमायाः
प्राथम्येनोल्लेखो विहितः–

उपमा रूपकं चैव यमकं दीपकं तथा ।
अलङ्कारास्तु विज्ञेयाश्चत्वारो नाटकाश्रयाः ॥(नाट्यशास्त्रम् ३।१७।४३)

भरतादारभ्याधुनावधि सर्वैरपि काव्याशास्त्रिभिरर्थालङ्कारेषूपमायाः प्रथमतया स्वरूपं प्रतिपादितम् । तेषां स्वस्वशैलिगतभिन्नतायाः कारणाद् लक्षणे भिन्नत्वे प्रतिभानेऽपि तत्र तात्त्विकमन्तरं न विद्यते । प्रायः सर्वैरपि सं_ स्कृतकाव्यशास्त्रिभिरुपमाया अनेकालङ्कारबीजरूपेण विविधवैचित्र्यरूपेण च विद्यमानत्वादधिकं महत्त्वमङ्गीकृतं दृश्यते – 'उपमैवानेकप्रकारवैचित्र्येणानेकालङ्कारबीजभूतेति प्रथमं निर्दिष्टा ।'(रुय्यकः अलङ्कारसर्वस्वम् २०२८ वि.सं., पृ.२६) उपमाया अनेकालङ्कारमूलत्वमङ्गीकुर्वन् आचार्योऽप्पयदीक्षितो रङ्गशालायां नृत्यन्त्या नट्या इवोपमायाः सहृदयहृदयरञ्जकत्वमङ्गीकृतवान्–

उपमैका शैलूषी संप्राप्ता चित्रभूमिकाभेदान् ।
रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः ॥ (दीक्षितः, चित्रमीमांसा, २०२८ वि.सं., पृ.६)

तेन हि –

तदिदं चित्रं विश्वं ब्रह्मज्ञानादिवोपमाज्ञानात् ।
ज्ञातं भवतीत्यादौ निरूप्यते निखिलभेदसहिता च ॥ (दीक्षितः, चित्रमीमांसा, २०२८ वि.सं., पृ.७)

इत्यनेन ब्रह्मज्ञाने निखिलस्य ब्रह्माण्डस्य ज्ञानं जायते तथैवोपमाया ज्ञाने सर्वेषामप्यलङ्काराणां ज्ञानं भव_ तीत्युपमाया वैशिष्ट्यं स्वीकृतम् । एवं हि प्रायः सर्वैरपि संस्कृतकाव्यशास्त्रिभिः समभिलषितार्थोपस्कारकत्वेनानेकास्त्र_ लङ्कारबीज- भूतत्वेन विविधवैचित्र्ययुतत्वेन च प्राथम्येन विस्तरेण चोपमा व्याख्याता । सर्वैरपि मूर्धन्यैः कविभिः स्वस्वकाव्येषु संगृहीता च । एवमेव नाटककारेण भवभूतिनोत्तररामचरितेऽप्युपमा बहुधा प्रयुक्ता विद्यते ।

**उत्तररामचरिते प्रयुक्ता उपमाः**

अलङ्कारेषूपमा प्रथमा श्रेष्ठा चालङ्कृतिरस्ति । या हि प्रायः सर्वैः काव्यकारैः स्वकीयेषु काव्येषु बाहुल्येन प्रयुक्ता दृश्यते । महाकविना कालिदासेन तु वाक्यार्थोपस्कारकतया चमत्कारतया च शैल्या बाहुल्येन प्रयुक्ता । अतः काव्यजगति 'उपमा कालिदासस्य' इति प्रसिद्धिश्च लब्धा । नाटककारेण भवभूतिनाप्युत्तररामचरित उपमायाः प्रयोग आधिक्येनैव विहितोऽस्ति । तत्र षड्पञ्चाशदुत्तर द्विशतसङ्ख्यातेषूनाशीतिपद्येषूपमाया एव प्रयुगो विद्यते । तत्र प्रथमेऽङ्के पञ्चमे नवमे विंशे चतुर्विंशे नवविंशे त्रिंशे षट्त्रिंशे चत्वारिंशे पञ्चचत्वारिंशे सप्तचत्वारिंशे नवचत्वारिंशे च पद्य उपमालङ्कारस्य प्रयोगो विद्यते । द्वितीयेऽङ्के चतुर्थे चतुर्विंशेऽष्टाविंशे च पद्य उपपालङ्कृतिरस्ति । तृतीयेऽङ्के प्रथमे पञ्चमे सप्तमे नवमे पञ्चदशे षोडशेऽष्टादशे नवदशे विंशे द्वाविंशे पञ्चविंशे सप्तविंशेऽष्टाविंशे

त्रिंशे द्वात्रिंशे पञ्चत्रिंशे षट्त्रिंशे सप्तत्रिंशे चत्वारिंशे एकचत्वारिंशे द्विचत्वारिंशे त्रिचत्वारिंशे सप्तचत्वारिंशे च पद्य उपमायाः प्रयोगो दृश्यते।

चतुर्थेऽङ्के द्वितीये तृतीये चतुर्थे पञ्चमे षष्ठे सप्तमे दशमे द्वादशे पञ्चदशे षोडशे सप्तदशे नवदशे एकविंशे षड्विंशे नवविंशे च पद्य उपमालङ्कृतिरस्ति। पञ्चमेऽङ्के द्वितीये तृतीये चतुर्थे पञ्चमेऽष्टमे नवमे चतुर्दशेऽष्टादशे षड्विंशे सप्तविंशे पद्य उपमा प्रयुक्ता विद्यते। षष्ठेऽङ्के प्रथमे द्वितीये तृतीये चतुर्थे षष्ठेऽष्टमे एकादशे त्रयोदशे सप्तदशे ऊनविंशे एकविंशे चतुर्विंशे पञ्चविंशे षड्विंशे सप्तविंशे त्रिंशे च पद्य उपमालङ्कारस्य प्रयोगो विहितोऽस्ति। सप्तमेऽङ्के तु केवलं विंशे पद्य उपमा विद्यते। एवमुत्तररामचरितनाटकस्य त्रिषु भागेषु प्राय एकभाग उपमायाः प्रयोगो विद्यते। एषा हि सङ्ख्या आनुपातिकरूपेणाधिकैव विद्यते। न केवलमुत्तररामचरिते सङ्ख्यादृशैवोपमायाः प्राचुर्यं विद्यते प्रत्युत चमत्कारदृशाप्युपमा प्राधान्येन विलसति।

## उत्तररामचरितगतानामुपमानां विश्लेषणम्

महामुनेर्भरतादारभ्याधुनावधि प्रायः सवैरपि काव्यशास्त्रिभिः स्वकीयेषु काव्यशास्त्रग्रन्थेषूपमा लक्षिता दृश्यते। सर्वैरपि काव्यनाटककारैः संस्कृतकाव्यनाटकेषूपमालङ्कृतिर्भूम्नैव प्रयुक्तास्ति। संस्कृतवाङ्मये महाकवेः कालिदासादनन्तरं भवभूतेर्नाट्यकृतिषु तत्राप्युत्तररामचरिते बहुधोपमा प्रयुक्तास्ति। अलङ्क्रियते अनेनेति व्युत्पत्त्या अलङ्कारशब्दो निष्पद्यते। अस्यार्थो भवति यत् कस्यापि वस्तुनोऽलङ्करणमर्थाद् उपस्करणम्। उत्तररामचरिते प्रयुक्ता उपमापि प्रधानभूतस्य वाक्यार्थस्य चोपस्कारिका वर्तते। अत्रोत्तररामचरितगतानामुपमानां क्रमिकरूपेण वि-श्लेषणं प्रस्तूयते।

अयं ते वाष्पौघस्त्रुटित इव मुक्तामणिसरो
विसर्पन् धाराभिर्लुठति धरणीं जर्जरकणः।
निरुद्धोऽप्यावेगः स्फुरदधरनासापुटतया
परेषामुन्नेयो भवति च भराध्मातहृदयः॥ (उत्तररामचरितम् १।२९)

अत्र हि रामस्य वाष्पौघस्य तुलना त्रुटितेन मुक्तामणिसरसा विहिता दृश्यते। पद्येऽस्मिन् वाष्पौघ उपमेयं मुक्तामणिसर उपमानम् इवोपमावाचकपदं त्रुटितात् मुक्तामणिहारात् प्रवाहैः प्रसरन् पृथ्व्यां पतनं रामस्य नेत्रात् प्रवाहेन प्रसरन् अश्रुसमूहस्य पतनं च बिम्बप्रतिबिम्बभावापन्नः साधारणधर्मो वर्तते। अत उपमायाश्चतुर्णां तत्त्वानां एकस्मिन् वाक्ये शब्दतः प्रयोगात् श्रौती वाक्यगा पूर्णोपमात्र वर्तते। अनयोपमया करुणरस उपस्कृतो वर्तते। अत एव 'उपस्का-रकत्वमलङ्कारत्वम्' (जगन्नाथः, रसगङ्गाधरः, २००३ ई., पृ.२११) इति शास्त्रं सङ्घटते।

हृदि नित्यानुषक्तेन सीताशोकेन तप्यते।
अन्तः प्रसृप्तदहनो जरन्निवः वनस्पति॥ (उत्तररामचरितम् ४।२)

अत्र हि कवी रामस्य हृदि विद्यमानं सीतावियोगजन्मानं शोकम् अन्तःप्रवृष्टदहनेन सह तुलयति। सीता_वियोगजन्मा शोक उपमेयं दहन उपमानम् इवोपमावाचकपदं तापः साधारणधर्मो वर्तते। अतोऽत्र श्रौती वाक्यगता पूर्णोपमालङ्कृतिर्विप्रलम्भशृङ्गारमुपस्कृत्य प्रस्तुतास्ति।

किसलयमिव मुग्धं बन्धनाद् विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः।

ग्लपयति परिपाण्डु क्षाममस्याः शरीरं
शरदिज इव घर्मः केतकीगर्भपत्रम् ॥ (उत्तररामचरितम् ३।५)

अत्र हि सीतायाः शरीरमुपमेयं किसलयमुपमानम् इव वाचकशब्दः परिपाण्डुत्वं क्षामत्वं च साधारणधर्मो वर्तते। अत्रेवस्य किसलयपदेन 'इवेन नित्यसमास विभक्त्यलोपश्च'(दीक्षितः, सिद्धान्तकौमुदी, २००१ ई., पृ.५) इति समासाद् विभक्तेरलोपाच्च श्रौती समासगा पूर्णोपमा वर्तते। हृदयकुसुमशोषी इत्यत्र हृदयं कुसुममिवेत्युमितसमासे हृदयमुपमेयं कुसुममुपमानम् इवोपमावाचकपदं शोषणं च साधारणधर्मो वर्तते। वाचकस्येवशब्दस्य समासे लोपात् समासगा वाचकलुप्तोपमास्ति। अत्र हि शरदिज घर्मः केतकीगर्भपत्रमिव दारुणो दीर्घशोकः शरीरं ग्लपयतीति दारुणो दीर्घशोकः शरीरञ्चोपमेयं शरदिज घर्मः केतकीगर्भपत्रञ्चोपमानम् इव वाचकशब्दः ग्लपनमर्थात् म्लानत्वं साधारणधर्मो वर्तते। तेनात्रापि श्रौती वाक्यगा
पूर्णोपमालङ्कृतिरस्ति। एताभिः तिस्रिभिरप्युपमाभिः सीतानिष्ठो रामविषयको विप्रलम्भशृङ्गारोऽलङक्रियते।

तत्कालं प्रियजनविप्रयोगजन्मा
तीव्रोऽपि प्रतिकृतिवाञ्छया विसोढः।
दुःखाग्निर्मनसि पुनर्विपच्यमानो
हृन्मर्मव्रण इव वेदनां करोति ॥ (उत्तररामचरितम् १।३०)

अत्र श्रौती समासगा पूर्णोपमा वर्तते। प्रियजनविप्रयोगजन्मा दुःखाग्निः हृन्मर्मव्रण इव वेदनां करोति। इत्यत्र दुःखाग्निरुपमेयं हृन्मर्मव्रण उपमानम् इवोपमावाचकपदं वेदना साधारणधर्मो वर्तते। इवेत्युपमावाचकपदस्योपमान_ भूतेन व्रणेन सह 'इवेन नित्य समासो विभक्त्यलोपश्च' (कात्यायनवार्तिकम् १२३६) इति वार्तिकेन नित्यसमासाद् विभक्तेर्लोपाभावाच्च श्रौती समासगा पूर्णोपमालङ्कृतिरस्ति। अत्रोपमा व्यज्यमानं करुणरसमुपस्कृत्य वैचित्र्येण स्थिता वर्तते।

अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः।
पुटपाकप्रतीकाशो रामस्य करुणो रस ॥(उत्तररामचरितम् ३।१।)

पद्येऽस्मिन् पुटपाकेन सह रामस्य शोकस्य तुलना विहिता वर्वते। शोक उपमेयं पुटपाक उपमानम् अनि_ र्भिन्नत्व–
गभीरत्वान्तर्गूढत्वादयः समानधर्मा सदृसार्थे प्रयुक्तः प्रतीकाश उपमावाचकपदं वर्तते। चतुर्णामेव तत्त्वानामुपादानात् पुटकपाकेन सह प्रतीकाशशब्दस्य समासाच्च समासगाऽर्थगतत्वादार्थी उपमालङ्कृतिरस्ति। रामस्य करुणो रस इत्यत्र रसस्य स्वशब्दवाचकत्वदोषे विद्यमानेऽप्यन्तर्व्यथादिभिर्व्यज्यमानस्य शोकस्स्योपस्कारकत्वाद् उपमाल-ङ्कारो विद्यते।

अतिशयितसुरासुरप्रभावं शिशुमवलोक्य तथैव तुल्यरूपम्।
कुशिकसुतमखद्विषां प्रमाथे धृतधनुषं रघुनन्दनं स्मरामि ॥ (उत्तररामचरितम् ५।४)

अत्र अतिशयितसुरासुरप्रभावयुक्तस्य शिशोर्लवस्य तुलना रघुनन्दनेन अर्थाद् रामेण सह विहितास्ति। शिशुर्लव उपमेयम् राम उपमानम् अतिशयशालित्वं सुरासुरप्रभावयुतत्वञ्च समानधर्मः तुल्यमित्युपमाबोधकः शब्दो वर्तते। अत्रोपमावाचकपदस्य रूपेण सह तुल्यं रूपं यस्य तम् इति समासे विद्यमानत्वात् पद्यमिदमार्थ्याः समासगायाः

पूर्णोपमाया उदाहरणं विद्यते। अत्र स्मृतिगतस्य वीररसस्योपस्कारकत्वाद् अलङ्कारसामान्यलक्षणं न हीयते।

गृहीतो यः पूर्वं परिणयविधौ कङ्कणधर–
श्चिरं स्वेच्छास्पर्शैरमृतशिशिरैर्यः परिचितः।
स एवायं तस्यास्तुहिननिकरौपम्यसुभगो
मया लब्धः पाणिर्ललितलवलीकन्दलनिभः ॥ (उत्तररामचरितम् ३।४०)

अत्र सीताया हस्तमुपमेयं तुहिननिकरमुपमानमौपम्यं सादृश्यवाचकपदं सुन्दरत्वं साधारणधर्मो वर्तते। सादृश्यवाचकस्यौपम्यपदस्य सुभगशब्देन सह समासत्वाद् आर्थी समासगा पूर्णोपमा विद्यते। अत्रैव सीतायाः पाणेस्तुलना ललितलवलीकन्दलेन सह वर्तते। अत्रापि हस्तमुपमेयं लवलीकन्दलमुपमानं ललितत्वं साधारणधर्मो निभः सादृश्यबोधकपदं वर्तते। 'ललितलवलीकन्दलनिभ' इत्यत्रोपमानं साधारणधर्मो सादृश्यवाचकपदञ्च समासे विद्यमानत्वाद् आर्थी समासगा पूर्णोपमा वर्तते। पद्येऽस्मिन्नुपमा स्मृतितया व्यज्यमानस्य विप्रलम्भशृङ्गाररसस्योपस्कारिका वर्तते।

महिम्नामेतस्मिन्विनयशिशुतामौग्ध्यमसृणो
विदग्धैर्निर्ग्राह्यो न पुनरविदग्धैरतिशयः।
मनो मे सम्मोहस्थिरमपि हरत्येष बलवा–
नयोधातुं यद्वत्परिलघुरयस्कान्तशकलः ॥(उत्तररामचरितम् ४।२१)

अत्र हि कविर्बालकं लवं चुम्बकखण्डेन सह तुलयति। अत्र वर्णनीयो लव उपमेयम् अयस्कान्तशकल उपमानं 'यद्वत्' इत्यत्र 'तत्र तस्यैव' इति सूत्रेण इवार्थे प्रयुक्तो वतिप्रत्यय उपमावाचकपदं हरणत्वं साधारणो धर्मो वर्तते। अतः श्रौती तद्धितगा पूर्णोपमालङ्कृतिरत्रास्ति। अत्रोपमा लवस्यातिशयप्रभावरूपं वस्तुव्यङ्ग्यमुपस्करोति।

दृष्टितृणीकृतजगत्त्रयसत्त्वसारा धीरोद्धता नमयतीव गतिर्धरित्रीम्।
कौमारकेऽपि गिरिवद् गुरुतां दधानो वीरो रसः किमयमेत्युत दर्प एव ॥ (उत्तररामचरितम् ६।१९)

अत्र हि वर्णनीयस्य बालकस्य लवस्य तुलना गिरिणा सह विहितास्ति। अत्र बालको लव उपमेयं गिरिरुपमानं गुरुत्वं साधारणधर्मो गिरिवद् इत्यत्र गिरिणा तुल्यमिति तुल्यार्थे 'तेन तुल्यं क्रिया चेद्वति' इति सूत्रेण जातो वतिप्रत्यय उपमावाचकपदं वर्तते। अतोऽत्र तद्धितगार्थी पूर्णोपमालङ्कृतिरस्ति। अलङ्कृतिरियं बालकस्य लवस्य लोकातिशायिपराक्रमरूपव्यङ्ग्यस्योपस्कारिका वर्तते।

विश्वम्भरा भगवती भवतीमसूत
राजा प्रजापतिसमो जनकः पिता ते।
तेषां वधूस्त्वमसि नन्दिनि पार्थिवानां
येषां कुलेषु सविता च गुरुर्वयं च ॥(उत्तररामचरितम् १।९)

पद्येऽस्मिन् राज्ञो जनकस्य तुलना प्रजापतिना सह विहितास्ति। जनक उपमेयं प्रजापतिरुपमानं सम उपमावाचकपदं वर्तते। ब्रह्मवित्त्वकर्मयोगित्वरूप साधारणधर्मो शब्दत उपात्तो नास्तीति धर्मलुप्तः समाग लुप्तोपमालङ्कारो विद्यते। अत्रत्या उपमा वस्तुव्यङ्ग्यस्योपस्कारिका वर्तते।

यस्यां ते दिवसास्तया सह मया नीता यथा स्वे गृहे
यत्सम्बन्धिकथाभिरेव सततं दीर्घाभिरास्थीयत।

एकः सम्प्रति नाशितप्रियतमस्तामद्य रामः कथं
पापः पञ्चवटीं विलोकयतु वा गच्छत्वसम्भाव्य वा ॥ (उत्तररामचरितम् २।२८)

अत्र वर्णनीया पञ्चवटी उपमेयं गृहम् उपमानं यथेति उपमावाचकपदं सुखपूर्वकं च साधारणधर्म वर्तते। अत्र सुखमयत्वरूपस्य साधारणधर्मस्य शब्दतोऽनुपादानात् श्रौती वाक्यगा धर्मलुप्तोपमा वर्तते। इयमुपमा करुणरस_ मुपस्कृत्य अलङ्कृतित्वमापन्नास्ति।

दुःखसंवेदनायैव रामे चैतन्यमागतम्।
मर्मोपघातिभिः प्राणैर्वज्रकीलायितं हृदि ॥ (उत्तररामचरितम् १।४७)

पद्येऽस्मिन् क्यङ्गो वाचकलुप्त उपमालङ्कारो वर्तते । प्राणा उपमेयं वज्रकीलान्युपमानं 'वज्रकीलायित'मित्यत्र वज्रकीलमिवाचरितमित्याचारार्थे इवोपमावाचकपदस्य लुप्तत्वाद् क्यङ्गाया वाचकलुप्ताया उदाहरणमिदम्। अत्राप्युपमा करुणरसपोषिका वर्तते।

येनोद्गच्छद्विसकिसलयस्निग्धदन्ताङ्कुरेण
व्याकृष्टस्ते सुतनु ! लवलीपल्लवः कर्णमुलात्।
सोऽयं पुत्रस्तव मदमुचां वारणानां विजेता
यत्कल्याणं वयसि तरुणे भाजनं तस्य जातः ॥ (उत्तररामचरितम् ३।१५)

पद्येऽस्मिन् वर्णनीयस्य गजशावकस्य दन्ताङ्कुरौ उपमेयं विसकिसलये उपमानं स्निग्धं समानधर्मो वर्तते। 'विसकिसलयस्निग्धदन्ताङ्कुरेण' इत्यत्र विसकिसलये तद्वत् स्निग्धौ दन्ताङ्कुरौ यस्य स तेन इति विग्रहे तद्वत् इति सादृश्यवाचक- पदस्य समासे लुप्तत्वात् समासगो वाचकलुप्तोपमालङ्कारोऽस्ति। अत्रत्योपमा स्मृतितया व्यज्यमा_ नस्य विप्रलम्भशृङ्गार- रसस्योपस्कारिका वर्तते।

म्लानस्य जीवकुसुमस्य विकासनानि
सन्तर्पणानि सकलेन्द्रियमोहनानि।
एतानि ते सुवचनानि सरोरुहाक्षि
कर्णामृतानि मनसश्च रसायनानि ॥ (उत्तररामचरितम् १।३६)

अत्र सीताया नयनयोस्तुलना सरोरुहेणार्थात् कमलेन सह विहितास्ति। अत्र सरोरुहमुपमेयं नयनञ्चोपमानं वर्तते। सरोरुहाक्षीत्यत्र सरोरुहे इव मनोज्ञे अक्षिणी यस्याः सेति समासे इवेत्युपमावाचकपदस्य मनोज्ञत्वस्य साधारण- धर्मस्य च
लुप्तत्वात् समासगा धर्मवाचकलुप्ता द्विलुप्तोपमालङ्कृतिरस्ति। अनयालङ्कृत्या संयोगशृङ्गाररस उपस्क्रियते।

कठोरपारावतकण्ठमेचकं वपुर्वृषस्कन्धबन्धुरांसकम् ।
प्रसन्नसिंहस्तिमितं च वीक्षितं ध्वनिश्च माङ्गल्यमृदङ्गमांसलः ॥ (उत्तररामचरितम् ६।२५)

अत्र हि प्रथमे चरणे वर्णनीययोर्बालकयोः शरीरस्य तुलना कपोतकण्ठेन विहिता वर्तते। अत्र वपुरुपमेयं कपोतकण्ठमुपमानं नीलत्वरूपं साधारणधर्मो वर्तते। 'कठोरपारावतकण्ठमेचक'मित्यत्र कठोरो यः पारावतः तस्य कण्ठ इव मेचकमिति समासे इवेत्युपमावाचकपदस्य लोपात् समासगा वाचकलुप्तोपमा वर्तते। अत्रैव द्वितीये चरणे 'वृषक्

स्कन्धबन्धुरांसकम्' इत्यत्र वृषस्य कन्धौ इव सुबन्धुरौ अंसौ यस्मिन् तत् इति समासे वाचकपदस्य लोपात् समासगा वाचकलुप्तोपमास्ति। अत्र वृषस्कन्ध उपमेयम् अंस उपमानं बन्धुरत्वं साधारणधर्मो वर्तते। तृतीये चरणे तु समासगा वाचकोपमानलुप्ता द्विलुप्तोपमा वर्तते। अत्र 'प्रसन्नसिंहस्तिमितं च वीक्षित'मित्यत्र प्रसन्नसिंहस्य वीक्षितं इव स्तिमितं वीक्षितं इति समासे उपमानभूतस्य वीक्षितस्य इवेतिवाचकपदस्य च लोपो वर्तते। तथैव चतुर्थे चरणेऽपि ' ध्वनिश्च माङ्गल्यमृदङ्गमांसल' इत्यत्र ध्वनिश्च मङ्गलसूचकमृदङ्गध्वनिरिव मांसल इत्यर्थे समासे इवेति वाचकपदस्य उपमानभूतस्य ध्वनेश्च लोपात् समागा वाचकोपमेय- लुप्ता द्विलुप्तोपमा वर्तते। अत्र एताः चतस्रोऽप्युपमा लवकुशयोः प्रभावातिशयवर्णनरूपस्य वाक्यार्थस्योपस्कारकाः सन्ति।

अयि कठोर यशः किल ते प्रियं किमयशो ननु घोरमतःपरम्।
किमभवद्विपिने हरिणीदृशः कथय नाथ कथं वत मन्यसे॥ (उत्तररामचरितम् ३।२७)

अत्र हि तृतीये चरणे 'हरिणीदृश' इत्यत्र हरिण्याः दृशौ इव चञ्चले दृशौ यस्याः सा इति विग्रहे सीतादृशौ उपमेयं हरिणीदृशौ उपमानम् इव वाचकशब्दश्चञ्चलत्वञ्च समानो धर्मः ततश्चोपमानवाचकस्य दृक्शब्दस्य समानधर्मवाचकस्य चञ्चलशब्दस्योपमावाचकस्य चेवशब्दस्य समासे लुप्तत्वात् समासगा धर्मोपमानवाचकलुप्ता त्रिलुप्तोपमालङ्कृतिर्वर्तते।

त्रस्तैकहायनकुरङ्गविलोलदृष्टे–
स्तस्याः परिस्फुरितगर्भरालसायाः।
ज्योत्स्नामयीव मृदुबालमृणालकल्पा
क्रव्याद्भिरङ्गलतिका नियतं विलुप्ता॥ (उत्तररामचरितम् ३।२८)

अत्र प्रथमे चरणे 'त्रस्तैकहायनकुरङ्गविलोलदृष्टे'रित्यत्र कुरङ्गस्य दृष्टी इव विलोले दृष्टी यस्याः सेति विग्रहे सीताया दृष्टी उपमेयं कुरङ्गस्य दृष्टी उपमानं त्रस्तत्वं विलोलत्वञ्च समानो धर्म इव चोपमावाचकपदं वर्तते। अत्र समासे उपमानभूतस्य कुरङ्गदृष्टेरिवोपमावाचकपदस्य च समासे लोपो जातः। अतोऽत्र समासगा वाचकोपमानलुप्ता द्विलुप्तोपमा वर्तते। एवमेव तृतीये चरणे 'ज्योत्स्नामयीव' इत्यत्र वर्णनीया सीता उपमेयं ज्योत्स्नामयी उपमानं इवेत्युपमावाचकपदं वर्तते। अत्र शुभ्रत्वसाधारणधर्मस्यानुल्लेखात् समासगा धर्मलुप्तोपमा वर्तते। तृतीये चरणे एव 'मृदुबालमृणालकल्पा' इत्यत्र वर्णनीयायाः सीताया अङ्गलतिकायास्तुलना मृदुबालमृणालेन सह विहितास्ति। अत्र अङ्गलतिकोपमेयं बालमृणालमुपमानं मृदु साधारणो धर्मः तुल्यार्थबोधकः तद्धितस्य कल्पप्रत्यय उपमावाचकपदं वर्तते। अतोऽत्र तद्धितगा आर्थी पूर्णोपमा वर्तते। अत्रत्याः सर्वा अपि उपमा वाक्यार्थभूतस्य करुणरसस्योपस्कारिका विद्यते।

## उपसंहारः

स्वाभिलषितार्थं प्रकटयितुं वेदेषूनिषत्सु पुराणादिषु दार्शनिकग्रन्थेषु काव्यनाटकादिषु जनसामान्यानां व्यवहारेषु चोपमालङ्कृतिः प्रयुक्ता दृश्यते। प्राचीनतमा श्रेष्ठा सर्वैरप्याचार्यैः कविभिश्च लक्षिता प्रयुक्ता चोपमालङ्कृतिरन्येषां बहूनामलङ्काराणां बीजभूता मन्यते। सर्वैरपि काव्यशास्त्रीभिरर्थालङ्कारेषु प्राथम्येन लक्षितेयं महाकविभिरप्यन्येषामर्थालङ्काराणामपेक्षयाऽऽधिक्येनैव प्रयुक्ता दृश्यते। नाटककारेण भवभूतिनापि करुणरसप्रधान उत्तररामचरि-

तनाटक

अलङ्कारान्तरापेक्षया उपमायाः प्रयोग आधिक्येन विहितो दृश्यते । तत्र षड्पञ्चाशदुत्तर द्विशतसङ्ख्यातेषूनाशीतिप_द्येषूपमाया एव प्रयुगो विद्यते । उत्तररामचरितनाटके हि पूर्णोपमाया वाक्यगायाः समासगायाः तद्धितगायाश्च सर्वेषामेव भेदानां लुप्तोपमायाश्च धर्मलुप्तायाः वाचकलुप्तायाः धर्मवाचकलुप्ताया धर्मोपमानवाचकलुप्तायाः एकद्वित्रिलुप्तानामनेके_षां भेदानां चमत्कारपूर्णशैल्या सहृदयहृदयह्लादकतया प्रयोगो विहितो दृश्यते । तत्रत्योपमा कुत्रचित् प्रबन्धव्यङ्क्यभूत_स्य करुणरसस्य कुत्रचिद् अङ्गभूतानां वीरशृङ्गारादिरसानां कुत्रचित्तु वस्तुव्यङ्ग्यस्योपस्कारकतया वैचित्र्येण विलसिता वर्तते । न केवलमुत्तररामचरिते

संख्यादृशैवोपमायाः प्राचुर्यं विद्यते प्रत्युत चमत्कारदृशाप्युपमा प्राधान्येन विलसति ।

## कृतज्ञताज्ञापनम्

शोधलेखस्यास्य प्रतिपादने येषां मनीषीणां ग्रन्था उपजीव्यत्वेन गृहीता येषाञ्च ग्रन्थाः सहयोगार्थमाकलिता येषाञ्च विदुषामुत्प्रेरणाभिः साहाय्यं विहितं यैश्च शोधकार्यमिदं समीक्ष्य प्रकाशनायाऽनुमतं तेभ्यः सर्वेभ्य कृतज्ञतां व्यनज्मि ।

## सन्दर्भग्रन्थसूची

अमरसिंहः (१९७० ई.), अमरकोषः वाराणसी : चौखम्बा सीरीज अफिस ।

जगन्नाथः (२००३ई.), रसगङ्गाधरः (द्वि.आ.) द्वि.सं., वाराणसी : चौखम्बा विद्याभवन ।

त्रिवेदी, रामगोविनदः(अनु.), (१९९७ ई.), ऋग्वेदः वाराणसी : चौखम्बा विद्याभवन ।

दीक्षितः, अपय्यः (२०२८ वि.सं.), चित्रमीमांसा वाराणसी : चौखम्बा संस्कृत संस्थान ।

दीक्षितः, भट्टोजि (२००१ ई.) सिद्धान्तकौमुदी (द्वि. भा.) वाराणसी : मोतीलाल बनारसीदास ।

पाणिनिः (१९५० ई.), अष्टाध्यायी वाराणसी : चौखम्बा विद्याभवन ।

मम्मटः (२००४ई.), काव्यप्रकाशः वाराणसी : ज्ञानमण्डललिमिटेड ।

याष्काचार्यः (१९८९ ई.), निरुक्तम् दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान ।

रुय्यकः (२०२८ वि.सं.), अलङ्कारसर्वस्वम् वाराणसी : चौखम्बा संस्कृत सीरीज अफिस ।

विश्वनाथः (२०००ई.), साहित्यदर्पणः दिल्ली : मोतीलाल वनारसीदास ।

शङ्कराचार्यः (१९८३ई.), विवेकचूडामणिः कलकत्ता : मनोहरलाल शर्मा चित्तरञ्जन एवेन्यु ।

शर्मा, श्रीराम(सं.) (१९८६ ई.), १०८ उपनिषद् (साधनाखण्डः), द्वि.सं., वरेली भारत : संस्कृति संस्थान वेदनगर ।